# श्रीगणेशकवचम्

गौर्युवाच ।
एषोऽति चपलो दैत्यान्बाल्येऽपि नाशय त्यहो ।
अग्रे किं कर्म कर्तेति न जाने मुनिसत्तम ॥ १॥

दैत्या नानाविधा दुष्टाः साधुदेव द्रुहः खलाः ।
अतोऽस्य कण्ठे किञ्चित्त्वं रक्षार्थं बद्ध मर्हसि ॥ २॥

मुनिरुवाच ।
ध्यायेत्सिंह हतं विनायक ममुं दिग्बाहु माद्ये युगे
त्रेतायां तु मयूरवाहन ममुं षड्बाहुकं सिद्धिदम् ।
द्वापारे तु गजाननं युगभुजं रक्ताङ्गरागं विभुम्
तुर्ये तु द्विभुजं सिताङ्ग रुचिरं सर्वार्थदं सर्वदा ॥ ३॥

विनायकः शिखां पातु परमात्मा परात्परः ।
अतिसुन्दरकायस्तु मस्तकं सुमहोत्कटः ॥ ४॥

ललाटं कश्यपः पातु भ्रूयुगं तु महोदरः ।
नयने भालचन्द्रस्तु गजास्यस्त्वोष्ठ पल्लवौ ॥ ५॥

जिह्वां पातु गणक्रीड श्चिबुकं गिरिजा सुतः ।
वाचं विनायकः पातु दन्तान् रक्षतु विघ्नहा ॥ ६॥

श्रवणौ पाश पाणिस्तु नासिकां चिन्तितार्थदः ।
गणेशस्तु मुखं कण्ठं पातु देवो गणञ्जयः ॥ ७॥

स्कन्धौ पातु गजस्कन्धः स्तनौ विघ्न विनाशनः ।
हृदयं गणनाथस्तु हेरंबो जठरं महान् ॥ ८॥

धराधरः पातु पार्श्वौ पृष्ठं विघ्नहरः शुभः ।
लिङ्गं गुह्यं सदा पातु वक्रतुण्डो महाबलः ॥ ९॥

गणक्रीडो जानुसङ्घे ऊरु मङ्गल मूर्तिमान् ।
एकदन्तो महाबुद्धिः पादौ गुल्फौ सदाऽवतु ॥ १०॥

क्षिप्र प्रसादनो बाहू पाणी आशा प्रपूरकः ।
अङ्गुलीश्च नखान्पातु पद्महस्तो ऽरिनाशनः ॥ ११॥

सर्वाङ्गानि मयूरेशो विश्वव्यापी सदाऽवतु ।
अनुक्त मपि यत्स्थानं धूम्रकेतुः सदाऽवतु ॥ १२॥

आमोदस्त्वग्रतः पातु प्रमोदः पृष्ठतोऽवतु ।
प्राच्यां रक्षतु बुद्धीश आग्नेयां सिद्धिदायकः ॥१३॥

दक्षिणास्या मुमापुत्रो नैर्ऋत्यां तु गणेश्वरः ।
प्रतीच्यां विघ्नहर्ताऽव्या द्वायव्यां गजकर्णकः ॥ १४॥

कौबेर्यां निधिपः पाया दीशान्या मीश नन्दनः ।
दिवाऽव्या देकदन्तस्तु रात्रौ सन्ध्यासु विघ्नहृत् ॥ १५॥

राक्षसासुर वेताल ग्रहभूत पिशाचतः ।
पाशाङ्कुश धरः पातु रजःसत्त्वतमः स्मृतिः ॥ १६॥

ज्ञानं धर्मं च लक्ष्मीं च लज्जां कीर्तिं तथा कुलम् ।

वपुर्धनं च धान्यं च गृह दाराः सुतान्सखीन् ॥ १७॥

सर्वायुध धरः पौत्रान् मयूरेशो ऽवतात्सदा ।
कपिलोऽजाविकः पातु गजाश्वान्विकटोऽवतु ॥ १८॥

भूर्जपत्रे लिखित्वेदं यः कण्ठे धारयेत्सुधीः ।
न भयं जायते तस्य यक्षरक्षः पिशाचतः ॥ १८॥

त्रिसन्ध्यं जपते यस्तु वज्रसार तनुर्भवेत् ।
यात्राकाले पठेद्यस्तु निर्विघ्नेन फलं लभेत् ॥ २०॥

युद्धकाले पठेद्यस्तु विजयं चाप्नुयाद्द्रुवम् ।
मारणोच्चाट नाकर्ष स्तम्भ मोहन कर्मणि ॥ २१॥

सप्तवारं जपे देत द्दिनाना मेकविंशतिम् ।
तत्तत्फल मवाप्नोति साधको नात्रसंशयः ॥२२॥

एकविंशति वारं च पठेत्ताव द्दिनानि यः ।
कारागृह गतं सद्यो राज्ञा वध्यं च मोचयेत् ॥ २३॥

राज दर्शन वेलायां पठे देतत्त्रिवारतः ।
स राजानां वशं नीत्वा प्रकृतीश्च सभां जयेत् ॥ २४॥

इदं गणेश कवचं कश्यपेन समीरितम् ।
मुद्गलाय च ते नाथ माण्डव्याय महर्षये ॥ २५॥

मह्यं स प्राह कृपया कवचं सर्वसिद्धिदम् ।
न देयं भक्ति हीनाय देयं श्रद्धावते शुभम् ॥ २६॥

अनेनास्य कृता रक्षा न बाधास्य भवेत्क्वचित् ।
राक्षसासुर वेताल दैत्य दानव सम्भवाः ॥ २७॥

इति श्रीगणेश कवचं सम्पूर्णम् ॥